# स्वप्नवासवदत्तगता रसयोजना

## रीताज्ञवाली पौड्यालः (विद्यावारिधिः)

*सहप्राध्यापकः, नेपालसंस्कृतविश्वविद्यालयः, विश्वविद्यालयविद्यापीठम्*

Jnawalir36nsu@gmail.com

Orcid : https://orcid.org/0009-0000-2926-7380

https://doi.org/10.3126/anveshana.v4i1.96923

**शोधसारः**

*अनुसन्धानात्मकलेखोऽयं स्वप्नवासवदत्तनाटकगतरसयोजनाविषयकविश्लेषणे केन्द्रितोऽस्ति। स्वप्नवासवदत्तनाटकपरिचयपूर्वकं गतरसयोजनाविश्लेषणोद्देश्येनायं शोधलेखो निर्मितः। लेखश्चायं गुणात्मकस्वरूपे संरचितः। अत्र विवेच्यनाटकाद् विविधरसयोजनोदाहरणरूपाः सामग्रीः काव्यशास्त्रीयग्रन्थादिभ्यश्च रससिद्धान्तसम्बद्धास्तद्भेदप्रभेदसम्बद्धाश्च तथ्यरूपाः सामग्रीः सङ्कलय्य तासां वर्णनं, विश्लेषणञ्च कृत्वा निष्कर्षः स्थापितोऽस्ति। अतोऽस्मिन् मूलतो वर्णनात्मको विश्लेषणात्मकश्चाध्ययनविधिरवलम्बितोऽस्ति। अत्र च मूलतः संस्कृतकाव्यशास्त्रस्थः रससिद्धान्तः सैद्धान्तिकपर्याधारत्वेन गृहीतोऽस्ति। दृश्यश्रव्यत्वभेदेन द्विविधे साहित्ये दृश्यकाव्यान्तर्गतं भासप्रणीतं स्वप्नवासवदत्तनाटकमतीव रमणीयं नाटकान्तरापेक्षया विशिष्टञ्च वर्तते। नानारसयुतेषु काव्येषु संस्कृतसाहित्ये प्रसिद्धेषु शृङ्गारहास्यकरुणादिषु नवरसेषु कस्याप्येकस्य रसस्याङ्गित्वमन्येषाञ्च रसानां तदुपस्कारकतयाऽङ्गत्वमपेक्ष्यते। कैश्चित् समीक्षकैरितिहासकारैश्च भासस्य स्वप्नवासवदत्तनाटके विप्रलम्भशृङ्गाररसस्याङ्गित्वं करुणहास्यादीनाञ्च रसानामङ्गत्वं सूत्रात्मकतयोल्लिखितं कैश्चित्तु तस्योद्बुद्धिरेव भवति परिपाको नास्तीति कथितम्, परन्त्वत्र नाटके शृङ्गाररसस्याप्रबन्धं परिपाको दृश्यते। सर्वविधलक्ष्यलक्षणसमन्वयपूर्वकविश्लेषणेन चात्र नाटके संयोगशृङ्गारस्याङ्गित्वमन्येषाञ्च विप्रलम्भशृङ्गारहास्यकरुणवीरशान्तानां तदुपस्कारकतया अङ्गत्वं सिध्यतीति निष्कर्षोऽत्र स्थापितः।*

**शब्दकुञ्जिका :** आलम्बनम्, उद्दीपनम्, व्यभिचारी, अनुभावः, चित्तवृत्तिः।

**विषयपरिचयः**

काव्यं खलु प्रभुसदृशोपदेशकृद्भ्यो वेदादिशास्त्रेभ्यो मित्रसदृशोपदेशकृद्भ्यः पुराणादिशास्त्रेभ्यश्च विलक्षणं कान्तासदृशोपदेशकृत् सहृदयहृदयाह्लादजनकं रमणीयमत एव विशिष्टञ्च मन्यते। एतच्च काव्यं श्रव्यदृश्यत्वभेदेन द्विविधम्। सामान्यतया महाकाव्यखण्डकाव्यादिश्रव्यकाव्यापेक्षया नाटकादिदृश्यकाव्यस्याधिकं महत्त्वं मन्यते। नाटकं हि श्रव्यदृश्योभयविधकलाऽऽश्लिष्टं नानारसयुतं सहजतयैव सहृदयहृदयाल्हादकञ्च भवति। संस्कृतनाट्यसाहित्ये

प्रथमनाटककारत्वेनोदितो भासः प्रतिमाभिषेक–बालचरित–पञ्चरात्र–मध्यमव्यायोग–दूतवाक्य–दूतघटोत्कचोरुभङ्ग–कर्णभाराभिमारक–चारुदत्त–प्रतिज्ञायौगन्धरायण–स्वप्नवासवदत्तैस्त्रयोदशग्रन्थरत्नैर्नाट्यसाहित्यं समलङ्कृतवान्। अस्य नाटकान्यत्यन्तं परिष्कृतानि कवित्वपरिपूर्णान्यभिनेयानि सरलानि मनोज्ञानि च विद्यन्ते। एतासु भासस्य नाट्यकृतिषु षडङ्केषु विभक्तं स्वप्नवासवदत्तं नाटकं सर्वोत्कृष्टमधिकं प्रसिद्धञ्चास्ति।

प्रायः काव्येषु नाटकेषु चैकरसस्याङ्गित्वमन्येषाञ्च रसानामङ्गत्वमपेक्ष्यते । नाटकेषु 'एक एव भवेदङ्गी शृङ्गारो वीर एव वा' इति विश्वनाथवचनानुसारेण शृङ्गारस्य वीरस्य वाङ्गित्वं निर्दिष्टं वर्तते। भवभूतिना तु करुणरसाङ्गीत्वस्य प्रयोग एव उत्तररामचरिते विहितः । परन्तु रूपकेषु हास्यादीनामन्येषामपि रसानां प्राधान्येनाभिव्यञ्जनमभिलक्ष्यते। संस्कृतकाव्यशास्त्रानुसारेण स्वप्नवासवदत्तनाटके व्यवस्थापितस्याङ्गिरसस्य तदुपस्कारकतया प्रस्तुतानामङ्गरसानाञ्च व्यवस्थापनस्य विश्लेषणमस्मिन् लघुलेखे विधीयते।

## समस्या

काव्येषु नाटकेषु चात्मतत्त्वभूतानां रसानामभिव्यञ्जनं भवत्येव। तदत्र स्वप्नवासवदत्तनाटकेऽभिव्यक्तस्याङ्गिरसस्य तदुपस्कारकाणामङ्गरसानाञ्च विश्लेषणमस्य शोधलेखस्य प्राज्ञिकी समस्या विद्यते। स्वप्नवासवदत्तनाटकेऽभिव्यक्तानां रसानामङ्गाङ्गित्वव्यवस्थापनं कथङ्कारं सञ्जातमस्ति ? इति शोधप्रश्नस्य समाधानार्थं लेखोऽयं प्रवृत्तो वर्तते।

## उद्देश्यम्

संस्कृतकाव्यशास्त्रानुसारेण स्वप्नवासवदत्तनाटकेऽभिव्यक्तस्याङ्गिरसस्याङ्गरसानाञ्च व्यवस्थापनस्य विश्लेषणमस्य लेखस्य प्रमुखमुद्देश्यं वर्तते।

## अध्ययनविधिः

अध्ययनमिदं गुणात्मकं वर्तते। अत्र पुस्तकालयात् सामग्रीः सङ्कलय्य निगमनरीत्या पाठविश्लेषणं विहितमस्ति। अस्य शोधकार्यस्य विषयक्षेत्रं साहित्यं वर्तते, तत्रापि संस्कृतकाव्यशास्त्रमेवाधारीकृत्य स्वप्नवासवदत्तनाटकेऽभिव्यक्तानामङ्गाङ्गिरसानां विश्लेषणमेवास्य लेखस्य शोधसीमा वर्तते।

## पूर्वकार्यसमीक्षा

रामजीमिश्रेण भासनाटकचक्रस्य प्रथमभागस्य भूमिकायां 'भासस्य नाटकेषु नवरसा' (भास के नाटकों मे नवरस) इति शीर्षकं विधाय स्वप्नवासवदत्ते "शृङ्गारकरुणरसौ वर्तेत इति निर्दिशता धर्मशृङ्गारः कामशृङ्गारोऽर्थशृङ्गारो

मुग्धशृङ्गारो मूढशृङ्गारश्चेति शृङ्गारस्य पञ्चभेदषु स्वप्नवासवदत्तनाटके वासवदत्तोदयनयोः प्रेम्णि कामशृङ्गारः, पद्मावत्युदयनयोः प्रेम्णि अर्थशृङ्गारो वर्तते" इत्युल्लिखितमस्ति। (मिश्रः, ई. १९७६, पृ. १४१–१४२)

स्वप्नवासवदत्तनाटकस्य व्याख्याकारेण शेषराजशर्मरेग्मिणा 'स्वप्नवासवदत्ते नायकादिनिरूपणम्' इति शीर्षक उदयनस्य वासवदत्तायां करुणविप्रलम्भशृङ्गाररसः पद्मावत्यां संयोगशृङ्गाररस वर्तत इत्युल्लिखितम्। (रेग्मी, ई.१९७९, पृ.१४)

आचार्यो बलदेवोपाध्यायो 'महाकवि भासः एक अध्ययन' इति नामके समीक्षाग्रन्थे – "अस्य नाटकस्य प्रधानो रसो रसराजः शृङ्गारो वर्तते। वासवदत्तोदयनयोर्दृष्ट्यात्र विप्रलम्भशृङ्गारस्य प्राधान्यं वर्तते। शृङ्गारातिरिक्तमुत्साहस्यापि वर्णनं लभ्यते। पद्मावतीवासवदत्तयोर्विनोदे शिष्टहास्योऽपि दृश्यते। विदूषकस्य वचनेषु हास्यस्योद्भावना जायते। चिन्तास्मृतिशङ्कासम्भ्रमादिमनोदशा अपि प्राप्यन्ते। प्रधानरसदृष्ट्या कोऽपि रस उद्दीप्तो नास्ति केवलं रसस्योद्बुद्धिर्भवती"ति प्रतिपादितवान्। (उपाध्यायः, ई. १९८२, पृ.११७।)

एवं ह्यनेकैर्भासनाटकानां टीकाकारैः साहित्येतिहासकारैश्च स्वप्नवासवदत्तनाटकेऽभिव्यज्यमानस्याङ्गिरसस्या–ऽ न्येसाञ्चाङ्गरसानां सूत्रात्मकरूपेण दिग्दर्शने विहितेऽपि सम्यक्तया स्वप्नवासवदत्तगतस्य मुख्यरसस्य तदङ्गभूतानां रसानाञ्च काव्यशास्त्रदृशा सयुक्तिकं विश्लेषणमवशिष्टमेवास्तीति तदर्थमेव शोधलेखोऽयं प्रवृत्तो विद्यते।

## सैद्धान्तिकपर्याधारः

संस्कृतकाव्यशास्त्रस्थः रससिद्धान्त एवात्रास्मिँल्लेखे सैद्धान्तिकपर्याधारत्वेन गृहीतोऽस्ति। स च पृथगुपशीर्षकेऽधस्ताच्चर्च्यते-

### रसस्वरूपं तद्भेदाश्च

संस्कृतसाहित्ये प्रचलितेषु रसालङ्कारध्वन्यादिषु षट्सु सिद्धान्तेषु रससिद्धान्तः प्राचीनः सर्वमान्यः प्रमुखश्च सिद्धान्तोऽस्ति। पाणिनीयव्याकरणानुसारेण भ्वादिगणपठितात् शब्दार्थकाद् रस्धातोः (वै.सि.कौ. धातुसङ्ख्या ७१३) चौरादिकाद् आस्वादनस्नेहनार्थकाद् रस्धातोश्च (वै.सि.कौ. धातुसङ्ख्या १९३१) रसशब्दो निष्पद्यते। संस्कृतवाङ्मये रसशब्दोऽनेकेष्वर्थेषु प्रयुक्तो दृश्यते। हैमकोशे रसशब्दस्य स्वादजलवीर्याद्यष्टादशार्थाः सङ्गृहीता विद्यन्ते (हैमकोशः)। आप्टे प्रतिपादिते संस्कृतवाङ्मयकोशे तु रसशब्दस्य त्रिंशदर्थाः सङ्कलिताः सन्ति (आप्टेकोशः)। संस्कृतवाङ्मयेऽनेकेषामर्थानां बोधनाय प्रयुक्तो रसशब्दः संस्कृतसाहित्ये तु शृङ्गारादीन् नवरसान् बोधयितुं प्रयुक्तो वर्तते। शृङ्गारादिरूपेऽर्थे न केवलं काव्यशास्त्र एव रसशब्दस्य प्रयोगो दृश्यते प्रत्युत वैदिकसंहितास्वप्यर्थेऽस्मिन् रसशब्दस्य प्रयोगस्य सङ्केता गोचरीभवन्ति–

यः पावमानीरध्येत्यृषिभिः संभृतं रसम्।
सर्वं स पूतमश्नाति स्वदितं मातरिश्वना॥(ऋग्वेद ९।६३।३१)

भरतेन नाट्यशास्त्रे ऋग्वेदात् पाठ्यम्, सामवेदाद् गीतिम्, यजुर्वेदादभिनयान्, अथर्ववेदाच्च रसान् सङ्गृह्य ब्रह्मणा नाट्यसृष्टिर्विहितेत्युल्लेखो कृतः –

जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतिमेव च ।

यजुर्वेदादभिनयान् रसानथर्वणादपि ॥ (नाट्यशास्त्रम् (प्र.भा.) १।१८)

एष एवार्थो नन्दिकेश्वरेणाप्यभिनयदर्पणे विहितः (अभिनयदर्पणः ७।८)। अथर्ववेदात् सङ्गृहितस्य रसस्य स्वरूपं तु भरतमुनेः 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति सूत्रादेव प्रथमतया विवेचितं दृश्यते। अस्य रससूत्रस्य विवेचनं तु विभिन्नैराचार्यैः स्वस्वसिद्धान्तानुसारेण पृथक् पृथक्तया विहितम्। पण्डितराजेन जगन्नाथेन रसगङ्गाधरे रससूत्रव्याख्यातृणामेकादशमतानि प्रस्तुतानि। तेषु भट्टलौल्लटस्योत्पत्तिवादः, श्रीशङ्कुकस्यानुमितिवादः, भट्टनायकस्य भुक्तिवादः, अभिनवगुप्तस्य चाभिव्यक्तिवादः प्रमुखा मन्यन्ते। एतेष्वभिनवगुप्तस्याभिव्यक्तिवाद एव पश्चाद्वर्तिभी रसवादिभिर्ध्वनिवादिभिराचार्यैः स्वस्वग्रन्थेषु सङ्गृहीतो व्याख्यातः सम्मानितश्च। आचार्येण मम्मटेन काव्यप्रकाशे व्यक्तिवादमेवाङ्गीकृत्य रसस्वरूपं प्रस्तुतम्–

कारणान्यथकार्याणि सहकारीणि यानि च ।

रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥

विभावा अनुभावास्तत्कथ्यन्ते व्यभिचारिणः ।

व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः ॥(काव्यप्रकाशः ४।२७,२८।)

अर्थात् लोके यानि कारणनि कार्यणि सहकाररीणि च प्रसिद्धानि सन्ति तानि काव्येषु नाटकेषु च विभावानुभावव्यभिचारिशब्दैर्ज्ञायन्ते। तैः विभावानुभावव्यभिचारिभिः सहृदयहृये वासनात्मकरूपेण विद्यमाना रतिहासशोकादयो स्थायिभावा व्यज्यन्ते । कारणरूपैर्विभावै कार्यरूपैरनुभावैः सहकारिरूपैर्व्यभिचारिभावैरभिव्यज्यमानो रत्यादिस्थायीभाव एव शृङ्गारादिरसरूपेण स्मर्यते।

रसात्मकं वाक्यमेव काव्यं मन्वताचार्येण विश्वनाथेनाप्यभिनवमम्मटमेवानुसरता रसस्य स्वरूपं प्रतिपादितम्–

विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।

रसतामेति रत्यादिस्थायिभावः सचेतसाम् ॥

सत्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः ।

वेद्यान्तरस्पशर्शून्यो ब्रह्मास्वादसहोदरः ॥

लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः ।

स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ॥(साहित्यदर्पणः ३।१–३।)

अर्थात् सहृदयहृदये वासनात्मकरूपेण स्थितो रत्यादिस्थायिभावः काव्यस्य नाटकस्य च श्रवणेन दर्शनेन च कारणरूपै–रालम्बनोद्दिपनविभावैः कार्यरूपैर्भ्रूविक्षेपकटाक्षाद्यनुभावैः सहकारिकारणरूपैर्निर्वेद-ग्लानिचिन्तादिव्यभिचारिभावैरभिव्यज्यमानः रसरूपतां परिणमति। रजस्तमस्यभिभूय सत्त्वगुणस्याधिक्यात् काव्यार्थातिरिक्तस्य वस्तुनो ज्ञानस्य शून्यतया ब्रह्मास्वादवत् लोकोत्तरचमत्कारेण सहृदयहृदयैः प्रमातृभिः स्वाभिन्नतया रस आस्वाद्यते।

पण्डितराजेन जगन्नाथेनाभिनवमम्मटादीनां मतमेव विश्लेषयता व्यक्त इत्यस्य व्यक्तिविषयीकृतः, व्यक्तिरित्यस्य च भग्नावरणचिद् इत्यर्थो विहितः। तदनुसारेण यथा शरावादिना पात्रेणाच्छादितो दीपस्तन्निवृत्तौ स्वविषयीभूतान् पदार्थान् प्रकाशयति स्वयमपि प्रकाशते तथैवावरणभङ्गे सञ्जात आत्मचैतन्यं स्वयं प्रकाशते विभावादिसम्मिलितान् रत्यादींश्च प्रकाशयति। यथा ह्यन्तःकरणधर्माणां साक्षिभाष्यत्वेन स्वप्नतुरगादीनां रङ्गरजतादीनां वा साक्षिभाष्यत्वं स्वीक्रियते तथैव विभावादीनामपि साक्षिभाष्यत्वं सिद्ध्यत्येव। व्यञ्जकतां गताया विभावादिचर्वणाया आवरणभङ्गस्य चोत्पत्तिविनाशाभ्यां रसनित्यत्वेऽप्युत्पन्नो रसो नष्टो रस इति व्यवहारो जायते। यथा हि सविकल्पे समाधौ वितर्कविचारादीनामाश्रयेण योगिनश्चित्तवृत्तिस्तद्रूपा सम्पद्यते तथैव सहृदयस्य निजप्रभाववशादुदृक्तेन विभावादिचर्वणामहिम्ना रत्यादिस्थायिभावोपहितस्वरूपानन्दरूपा चित्तवृत्तिः सम्पद्यते। अभिनवमम्मटादिग्रन्थस्वारस्येन भग्नावरणचिद्विशिष्टो रत्यादिस्थायिभावो रस इति स्थिरीभवति परन्तु जगन्नाथदृशा तु 'रसो वैसः, रस ह्येवायं लब्ध्वानन्दीभवति' इति श्रुतिस्वारस्येन रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसो भवति ( जगन्नाथः, ई.२००३, पृ. ९०–९७)।

संस्कृतकाव्यशास्त्रे हि रससङ्ख्याविषये मतभेदो दृश्यते। प्राचीनादेव कालात् शृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भुतश्चेत्यष्टौ रसाः सर्वमान्यतया प्रचलिता दृश्यन्ते–

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।

बीभत्सात्भुतसंज्ञौ चेत्यष्टौ रसाः स्मृताः॥ (नाट्यशास्त्रम् १। ६।१५)

परमभिनवादिभिराचार्यैस्तु भरतमुनिना नवरसाणामेव प्रतिपादनं विहितमिति नाट्यशास्त्रस्य मधुसूदनशास्त्रिणा सम्पादितस्य संस्करणान्तरस्योल्लेखं विधाय गरीयोभिस्तर्कैर्वलीयसीभिर्युक्तिभिश्च शान्तसहिता नवरसा व्याख्याताः –

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।

बीभत्सात्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः॥(नाट्यशास्त्रम् १।६।१६)

परवर्तिनि समये तु विभिन्नैराचार्यैं रससङ्ख्यायां वृद्धये प्रयत्नः कृतः। यदि समये समये विद्वद्भिः संस्थापितानां रसानां गणना विधीयते तदा तु रसानां सङ्ख्या नवतिमतिक्रामति (ज्ञवाली, वि.सं.२०६२, पृ.५०–५२ )। आचार्यस्याभिनवगुप्तस्यानुसारेण प्रत्येकेषु प्राणिषु विद्यमानाः स्थायिनः चित्तवृत्तयः समुचितैरुपकरणैरर्थाद् विभावानुभावादिभी रत्यादिषु स्थायिषु परिणमय्य रसरूपतां गच्छन्ति। ताश्च चित्तवृत्तयो नव सन्ति – १) रिरंसात्मिकी चित्तवृत्तिः २) उपहासात्मिकी चित्तवृत्तिः ३) सन्तापात्मिकी चित्तवृत्तिः ४) कोपात्मिकी चित्तवृत्तिः ५) अर्जनोन्मुखी चित्तवृत्तिः ६) प्रतिकारासामर्थ्ये समुत्पन्ना चित्तवृत्तिः ७) अनभीष्टविषयेषु वैमुख्यात्मिकी चित्तवृत्तिः ८) चकितात्मिकी चित्तवृत्तिः ९) जिहासात्मिकी चित्तवृत्तिश्च। एता एव चित्तवृत्तयः क्रमशः रतिहासशोकभयजुगुप्साविस्मयनिर्वेदेषु स्थायित्वेन लक्ष्यन्ते। एतासां चित्तवृत्तीनां सर्वथाभावः कस्मिन्नपि प्राणिनि न भवति। (शुक्लः(सं.), ना.शा.अभि.भा., वि.सं.२०५७, पृ.२६५)। एतासां चित्तवृत्तीनां स्थायित्वेनैव संस्काररूपेणावस्थानादयं रतिमानयञ्चोत्साहवानित्यादयो व्यवहाराः सम्पद्यन्ते। तस्माद् नवैव स्थायिभावा भवन्ति। अत एवाष्टौ नव वा स्थायिनी चित्तवृत्तिः समाश्रित्य निरूपितान् स्थायिभावानाधृत्य श्रृङ्गारहास्यकरुणरौद्रवीरभयानकबीभत्साद्भुता अष्टौ शान्तेन सहिता नव वा रसाः सिद्ध्यन्ति। (ज्ञवाली, वि.सं.२०६२, पृ.११२ ) रसानां प्रातिस्वीकं स्वरूपविवेचनन्त्वाश्यकानामेव रसानां विश्लेषणावसरे विधीयते।

## विषयविश्लेषणम्

उपर्युपस्थापितसैद्धान्तिकपर्याधारमाधृत्यात्र स्वप्नवासवदत्तनाटकगतरसयोजनाविषयकं विश्लेषणं क्रियते।

### स्वप्नवासवदत्तनाटकेऽभिव्यक्ता रसाः

विक्रमस्य प्रथमशताब्द्याः पूर्वं जातस्य नाटककारस्य भासस्य त्रयोदशसु नाटकेषु स्वप्नवासवदत्तनाटकं सर्वोत्कृष्टं सुप्रसिद्धञ्च वर्तते। नाटकमिदं प्रतिज्ञायौगन्धरायणस्यावशिष्टोंऽशो वर्तते (शर्मा, ई.२००८, पृ.४)। षडङ्केषु विभक्तेऽस्मिन् नाटके राजा उदयनो नायको वासवदत्ता पद्मावती च नायिके वर्तेते। समीक्षकैरुदयनाश्रिता वासवदत्तनिष्ठा रतिर्विप्रलम्भशृङ्गाररसत्वेन उदयनाश्रिता पद्मावत्यालम्बना च रतिः संयोगशृङ्गाररूपेण व्याख्याता, तैरस्यैव शृङ्गाररसस्य प्राधान्यमङ्गित्वञ्च स्वीकृतम्। करुणवीरहास्यशान्तादयो रसाश्चाङ्गत्वेनाभिव्यक्ताः सन्ति। शोधलेखेऽस्मिन् स्वप्नवासवदत्तनाटकेऽभिव्यक्तानां शृङ्गारहास्यकरुणवीरशान्तानां रसाणामेव विश्लेषणं विधीयते।

#### *अङ्गिरसःशृङ्गारः*

शृङ्गमियर्तीति विग्रहे शृङ्गोपपदाद् ऋधातोः कर्मणि 'अण्' प्रत्यये (अष्टाध्यायी ३।२।१) शृङ्गारः शब्दो निष्पद्यते। शृहिंसायाम् इति धातोः'आरन्' प्रत्ययेऽपि (अष्टाध्यायी, उणादि. ३।४१६) शृङ्गारशब्दो निष्पद्यते। कोशेषु गजमण्डनं नागसम्भवः सुरतो रसभेदश्चेति (हैमकोशः ६५०,६५१) शृङ्गारस्य चत्वारोऽर्था लभ्यन्ते। शृङ्गारशब्दस्य शुचिरुज्ज्वलः (अमरकोशः १।७।१७) चेति द्वौ पर्यायौ वर्तेते। विश्वनाथस्यानुसारेण शृङ्गस्य मन्मथोद्भेदस्योत्पत्तेः

कारणात् शृङ्गारः कथ्यते। रसोऽयं प्राय उत्तमप्रकृतिको भवति। अत्र परोढामननुरागिणीं वेश्याञ्च वर्जयित्वान्याः सर्वा नायिका दक्षिणाद्या नायकाश्चालम्बनविभावाः, चन्द्रचन्दनद्विरेफाद्या उद्दिपनविभावाः, भ्रूविक्षेपकटाक्षाद्या अनुभावाः, उग्रतामरणालस्यजुगुप्सारूपान् व्यभिचारिणो विहायाऽन्ये सर्वे व्यभिचारिभावाः, रतिश्च स्थायिभावः शृङ्गाररसे भवन्ति। अस्य रसस्य श्यामवर्णो विष्णुश्चाधिष्ठातृदेवो वर्तते। संयोगविप्रलम्भश्चेति शृङ्गाररसस्य भेदद्वयं वर्तते। विप्रलम्भोऽपि पूर्वरागमानप्रवासकरुणभेदेन चतुर्विधः (साहित्यदर्पणः ३।१८२–१८७)। स्वप्नवासवदत्तनाटके हि संयोगशृङ्गारस्य विप्रलम्भशृङ्गारस्योभयोः प्रकारयोरेव स्थितिर्दृश्यते। विप्रलम्भस्यापि पूर्वरागकरुणयोरुदाहरणान्यत्र लभ्यन्ते।

तत्र प्रथमेऽङ्के ब्राह्मणवेषधारिणो यौगन्धरायणस्यावन्तिकावेषधारिण्या वासवदत्तायाश्च तपोवने पद्मावत्या सह मेलनानन्तरं यौगन्धरायणस्य ब्रह्मचारिणो वार्तालापे वत्सभूम्या लावाणकस्य नाम श्रुत्वा सा कथयति– 'हा लावाणकं नाम। लावाणकं सङ्कीर्तनेन पुनर्नवीकृत इव मे सन्तापः' (भासः, स्वप्नवासवदत्तम्, (ई.२००८), पृ.३६)। ततश्च तयोर्वार्तालापे वासवदत्तायौगन्धरायणयोरग्निदाहस्य कारणाद् राजा अपि मूर्छित इत्यादिवार्तां श्रुत्वा सा रोदिति। अतोऽत्र वासवदत्तानिष्ठोदयनविषयिणी रतिर्विप्रलम्भशृङ्गाररसत्वेनाभिव्यज्यते। एवमेव–

"वासवदत्ता – विवाहामोदसङ्कुले अन्तःपुरचतुःशाले परित्यज्य पद्मावतीमिहागतास्मि प्रमदवनम्। यावदिदानीं भागधेयनिर्वृत्तं दुःखं विनोदयामि।(परिक्रम्य) अहो ! अत्याहितम्। आर्यपुत्रोऽपि नाम परकीयः संवृत्तः। यावत् उपविशामि। धन्या खलु चक्रवाकबधूः, याऽन्योन्यविरहिता न जीवति। न खल्वहं प्राणान् परित्यजामि। आर्यपुत्रं पश्यामीत्येतेन मनोरथेन जीवामि मन्दभागा" (भासः, स्वप्नवासवदत्तम्, (ई.२००८), पृ.६२)।

अत्र हि वासवदत्ताश्रयालम्बनं राजा उदयनो विषयालम्बनं प्रमदवनमुद्दिपनं परिभ्रमणमनुभावः, 'अहो ! अत्याहितम्' इत्यनेनाभिव्यक्तो विशादः, 'आर्यपुत्रोऽपि नाम परकीयः संवृत्त' इत्यनेनाभिव्यक्ता चिन्ता 'धन्या खलु चक्रवाकबधू' 'याऽन्योन्यविरहिता न जीवती'त्यनेनाभिव्यक्तासूया, 'न खल्वहं प्राणान् परित्यजामि' इत्यनेनाभिव्यक्ता धृतिरित्यादिभि– र्व्यभिचारिभिरभिव्यक्ता वासवदत्तनिष्ठोदयनविषयिणी रतिः शृङ्गाररसत्वेनाभिव्यज्यते। अत्र च वासवदत्ताया उदयनेन सह वियोगात् विप्रलम्भशृङ्गाररसः, यत्राऽनुरागे सत्यपि प्रियसमागमो न भवति तत्र विप्रलम्भशृङ्गाररसो भवति (साहित्यदर्पणः ३।१८७)।

"वासवदत्ता – अहो ! अत्याहितम्। आर्यपुत्रोऽपि नाम परकीयः संवृत्तः। अविदा शय्यायां मम दुःखं विनोदयामि, यदि निद्रां लभे " (भासः स्वप्नवासवदत्तम्, ई.२००८), पृ.६९)।

इत्यत्र वासवदत्तनिष्ठोदयनविषयिणी रतिर्विप्रलम्भशृङ्गाररसत्वेनाभिव्यक्ता वर्तते। अत्र स्वस्य स्वरूपं गोपयित्वा स्थिता वासवदत्ताऽऽश्रयालम्बनमुदयनो विषयालम्बनम् 'अहो ! अत्याहितम्' इत्यनेनाभिव्यक्तो विशादः, 'आर्यपुत्रोऽपि नाम परकीयः संवृत्तः' इत्यनेनाभिव्यक्त्यौ चिन्तास्मृत्यौ 'शय्यायां मम दुःखं विनोदयामि' इत्यनेन

चाभिव्यक्ता धृतिर्व्यभिचारिणः सन्ति। एतैर्विभावानुभावव्यभिचारिभिर्व्यज्यमाना रतिः विप्रलम्भशृङ्गाररसमनुभावयति।

उदयनस्य गुणगणान् श्रुत्वा पद्मावती तस्मिन् अनुरक्ता जायते –'मम हृदयेनैव सह मन्त्रितम् ' (भासः स्वप्नवासवदत्तम्, ई.२००८), पृ.४६। इत्यत्र तु पद्मावतीनिष्ठोदयनविषयिणी रतिः पूर्वरागविप्रलम्भशृङ्गाररसत्वेनाभिव्यज्यते। सौन्दर्यादिगुणानां दर्शनेन श्रवणेन वा परस्परमनुरक्तयोर्नायकनायिकयोः समागमपूर्वावस्था पूर्वराग उच्यते। (साहित्यदर्पणः ३।१८८) अत्रापि ब्रह्मचारिणो मुखादुदयनस्य गुणगणान् श्रुत्वा पद्मावती तस्मिन्ननुरक्ता भवति। पद्मावत्याश्रयालम्बनमुदयनो विषयालम्बनं गुणकीर्तनमुद्दीपनं गुणान्श्रुत्वा प्रसन्नवदनत्वमनुभाव औत्सुक्यञ्च व्यभिचारिभावो वर्तते।

कामेनोज्जयिनीं गते मयि तदा कामप्यवस्थां गते।

दृष्ट्वा स्वैरमवन्तिराजतनयां पञ्चेषवः पातिताः।

तैरद्यापि सशल्यमेव हृदयं भूयश्च विद्धा वयं

पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः॥ (स्वप्नवासवदत्तम्, ४।१)

पद्येऽस्मिन्नुदयननिष्ठा वासवदत्ताविषयिणी पद्मावतीविषयिणी च रतिर्व्यज्यमानास्ति। प्रथमं वासवदत्ता विषयालम्बनम् उदयन आश्रयालम्बनमुपवनमुद्दिपनम् 'अवन्तिराजतनयां दृष्टवा कामप्यवस्थां गते मयि' इत्यादिनाभिव्यक्तं रोमाञ्चमनुभावः 'कामेन पञ्चेषवः पातिताः' इत्यनेनाभिव्यक्ताः स्मृतिचिन्तावितर्कादयो व्यभिचारिण एतैः पुष्टो रतिर्विप्रलम्भशृङ्गाररसरूपतां धत्ते। अपरञ्च पद्मावती विषयालम्बनमुदयन आश्रयालम्बनमुपवनमुद्दीपनं रोमाञ्चमनुभावः 'भूयश्च मदनः कथमयं षष्ठः शरः पातितः' इत्यादिनाभिव्यक्ताः शङ्कास्मृतिचिन्तादयो व्यभिचारिणो रतिश्च स्थायी संयोगशृङ्गाररसमनुभावयति।

मधुमदकला मधुकरा मदनार्ताभिः प्रियाभिरुपगूढाः ।

पादन्यासविषण्णा वयमिव कान्तावियुक्ताः स्युः ॥(स्वप्नवासवदत्ता ४।३)

राजा उदयनो विदूषकश्च वासन्तीलतामण्डपे पद्मावत्याः प्रतिक्षां विधाय स्थितवन्तौ । मधुकरैः पिडीतं मधुकरान् त्रासयितुमुत्सुकं विदुषकं ततो निवारयन् कथयति राजा 'मदनार्तिभिः प्रियाभिरुपगूढा मधुमदकलाः पादन्यासविषण्णा मधुकराः वयमिव कान्तावियुक्ताः स्यु'रिति। अत्र राजा उदयननिष्ठा वासवदत्ताविषयिणी पद्मावतीविषयिणी च रतिविर्प्रलम्भशृङ्गारत्वेनाभिव्यक्तास्ति। अत्र वासवदत्ता पद्मावती च विषयालम्बनं राजा उदयन आश्रयालम्बनं मदनार्ताभिः प्रियाभिरुपगूढा मधुकरा वासन्तीलतामण्डपञ्चोद्दीपनं 'वयमिव कान्तावियुक्ता'

इत्यनेनाभिव्यक्ताः स्मृतिचिन्तादयो व्यभिचारिणः रतिश्च स्थायिभावो वर्तते। अतः पद्येऽस्मिन् विप्रलम्भशृङ्गाररसो व्यज्यमानोऽस्ति।

पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः।

वासवदत्ताबद्धं न तु तावन्मे मनो हरति ॥(स्वप्नवासवदत्तम्, ४।४)

अत्र हि वासवदत्ताविषयिण्युदयननिष्ठोपवनादिदर्शनेनोद्दीपिता गुणगणादीनां स्मरणेनानुभाविता स्मृतिचिन्तावितर्कादिभि– र्व्यभिचारिभिरभिव्यक्ता रतिर्विप्रलम्भशृङ्गाररसे परिणमति।

शरच्छशाङ्कगौरेण वाताविद्धेन भामिनि।

काशपुष्पलवेनेदं साश्रुपातं मुखं मम ॥

इयं बाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत्।

कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः ॥(स्वप्नवासवदत्तम् ४।७,८)

अनयोः पद्ययोर्नायकस्य राज्ञ उदयनस्य वासवदत्तायां पद्मावत्याञ्चानुरागोऽभिव्यक्तो वर्तते। उदयनविदूषकयोर्वार्तालापे वासवदत्तां स्मृत्वोदयनस्य मुखं साश्रुपातं भवति। प्रथमे पद्येऽग्निना दग्धा वासवदत्ता विषयालम्बनमुदयन आश्रयालम्बनं वासवदत्तायाः स्मृतिरुद्दीपनमश्रुपतनयुक्तवदनमनुभावः स्मृतिर्व्यभिचारिभावो रतिश्च स्थायिभावः करुणविप्रलम्भरसं पोषयति। द्वितीये पद्ये पद्मावती विषयालम्बनमुदयन आश्रयालम्बनं नवविवाहितायाः पत्न्या दर्शनमुद्दिपनं मिथ्याकथनमनुभावः सत्यं श्रुत्वा व्यथां व्रजेत् इत्यनेनाभिव्यक्ता मतिधृतिचिन्तादयो व्यभिचारिणः, एतैरभिव्यक्तोदयननिष्ठा पद्मावतिविषयिणी रतिः संयोगशृङ्गाररसत्वेनावभाषते सहृदयहृदये।

अथ च पञ्चमेऽङ्के राजा उदयनो पद्मावत्याः शिरोवेदनायाः समाचारं ज्ञात्वा समुद्रगृहकं गच्छति परन्तु तत्र सा नभवति। स तत्रैव प्रतीक्ष्यमाणः स्वपिति। वासवदत्तापि पद्मावत्याः शिरोवेदनायाः समाचारं ज्ञात्वा तत्रैव गच्छति। शयाने उदयने पद्मावतीभ्रान्त्या वासवदत्ता तत्रैव पार्श्वे तिष्ठति। तदैव निद्रात उदयनो वासवदत्ताया नाम गृह्णात्यधिकं विलपति च। स्वप्ने वासवदत्तया सह वार्तामपि विदधाति। वासवदत्ता चिरं जातमिति धिया शय्याप्रलम्बितमुदयनस्य हस्तं शयनीये संस्थाप्य ततो निष्क्रामति। उदयनः तत्स्पर्शमनुभूय सहसा उत्थाय कथयति –

निष्क्रामं सम्भ्रमेणाहं द्वारपक्षेण ताडितः।

ततो व्यक्तं न जानामि भूतार्थोऽयं मनोरथः ॥

शय्यायामवसुप्तं मां बोधयित्वा सखे गता।

दग्धेति ब्रुवता पूर्वं वञ्चितोऽस्मि रुमण्वता ॥

यदि तावदयं स्वप्नो धन्यमप्रतिबोधनम् ।

अथायं विभ्रमो वा स्याद्, विभ्रमो ह्यस्तु मे चिरम् ॥

स्वप्नस्यान्ते विबुद्धेन नेत्रविप्रोषिताङ्गनम् ।

चारित्रमपि रक्षन्त्या दृष्टं दीर्घालकं मुखम् ॥

योऽयं सन्त्रस्तया देव्या तया बाहुर्निपीडितः ।

स्वप्नेऽप्युत्पन्नसंस्पर्शो रोमहर्षं न मुञ्चति ॥( स्वप्नवासवदत्तम् ५।७–११)

एतेषु पद्येषूदयननिष्ठा वासवदत्ताविषयिणी रतिः करुणविप्रलम्भशृङ्गाररसत्वेनावभाषते। नायकनायिकयोरेकतरस्मिन् दिवंगते कोऽप्येको दुखितो भवति परन्तु पुनर्मिलनस्याशा भवति चेत् तत्र करुणविप्रलम्भशृङ्गाररसो भवति।(साहित्यदर्पणः ३।०९) अत्रापि वासवदत्ता हूतवहेन दग्धा इति कथनेऽप्युदयनेन स्वप्ने सा दृष्टा। तस्याः स्पर्शोऽप्यनुभूतः। सा जीवितास्तीति भानमपि तस्मिन् सञ्जातम्। परन्त्वधुनावधि वासवदत्ता हूतवहेन दग्धा मृता चेति तस्य मनसि सा मृतेत्येव वर्तते। अत एव मृतां वासवदत्तामालम्ब्य उदयननिष्ठः शोकः करूणरूपत्वेनैवानुभूतिपदं गच्छति। परं स्वप्ने उदयनस्य मनसि वासवदत्तया पुनर्मिलनस्याशा भवति। अतः वासवदत्तामालम्ब्य करुणविप्रलम्भशृङ्गाररसो वर्तते। परन्तु वासवदत्ता तु एतत् सर्वं जानाति। सा 'दृष्ट्या स्वप्नायते खल्वार्यपुत्रः। नात्र कस्चिज्जनः। यावन्मुहूर्तकं स्थित्वा दृष्टिं हृदयं च तोषयामि' इत्युक्त्वा तिष्ठति। अतः वासवदत्तापक्षतस्त्वत्र संयोगशृङ्गाररसो वर्तते। अत एव एतेषु पद्येषु करुणस्य करुणविप्रलम्भशृङ्गारस्य संयोगशृङ्गारस्य च सङ्कीर्णत्वं दृश्यते। एवञ्च षष्ठाङ्कस्य प्रारम्भे–

श्रुतिसुखनिनदे ! कथं नु देव्याः स्तनयुगले जघनस्थले च सुप्ता।

विहगगणरजोविकीर्णदण्डा प्रतिभयमध्युषिताऽस्यरण्यवासम् ॥

श्रोणीसमुद्वहनपार्श्वनिपीडितानि खेदस्तनान्तरमुखान्युपगूहितानि।

उद्दिश्य मां च विरहे परिदेवितानि वाद्यान्तरेषु कथितानि च संस्मितानि ॥(स्वप्नवासवदत्तम् ६।१,२)

राज्ञ उदयनस्य सूर्याभिमुखप्रासादे केनापि वीणा वादिता। तत्श्रुत्वा तत्र गत्वा वीणां गृहीत्वा राजा मूर्छितः। ततो प्रत्यागतेन राज्ञा उदयनेन भणितं 'दृष्टासि घोषवति ! सा न दृश्यत' इति। अनयोः पद्ययोरपि वासवदत्तानिष्ठोदयनविषयिणी रतिः करुणविप्रलम्भशृङ्गाररसं परिणमति। यतो घोषवती वीणा वासवदत्तायाः

प्रियाऽऽसीत् सा लब्धा अत वासवदत्ता लभ्यत इत्याशा उदयनस्य मनस्युत्पद्यते। स्मृतिनामकेन व्यभिचारिणा च करुणविप्रलम्भरसः पोष्यते।

अस्य स्निग्धस्य वर्णस्य विपत्तिर्दारूणा कथम् ?

इदं च मुखमाधुर्यं कथं दूषितमग्निना ? ॥(स्वप्नवासवदत्तम् ६।१३)

इत्यत्राप्युदयनस्य वासवदत्तां प्रति रतिर्व्यज्यते। वासवदत्ता विषयालम्बनमुदयन आश्रयालम्बनं चित्रफलके वासवदत्तायाः चित्रस्य दर्शनमुद्दीपनम् 'अस्य स्निग्धस्य वर्णस्य कथं दारूणा विपत्तिः कथं मुखमाधुर्यमग्निना दूषित'मित्यादिना प्रलपनमनुभावः स्मृतिचिन्तादयो व्यभिचारिण एतैरभिव्यक्ता रतिः करुणविप्रलम्भशृङ्गाररसतां परिणमति।

नाटकस्य समाप्तौ च सर्वेषां मिलनं भवति। अवन्तिका स्वरूपा वासवदत्तेति ब्राह्मणवेषधारी यौगन्धरायण इति च सर्वे जानन्ति। उदयनस्य वासवदत्तया पद्मावत्या च सह समागमो भवति। संयोगे नाटकस्य समाप्तिर्भवति। अत एव बहुषु स्थलेषु पदद्योत्यत्वेन वाक्यद्योत्यत्वेन प्रकरणद्योत्यत्वेन प्रबन्धद्योत्यत्वेन च पूर्वरागविप्रलम्भ–करुणविप्रलम्भ–विप्रलम्भ–संयोगशृङ्गाराणां परिपाको दृश्यते। तत्रापि राज्यप्राप्तिरूपेण फलागमेन सहैवोभयोरपि नायिकयो नायकस्य च मिलनं वर्तत इत्यस्य नाटकस्य संयोगशृङ्गार एव रसोऽङ्गी वर्तते। किञ्च प्रबन्धव्यापित्वेन बारं बारमनुभूताः पूर्वरागविप्रलम्भ–करुणविप्रलम्भ–विप्रलम्भरसाश्च अन्ततः संयोगमेव पोषयन्ति।

**अङ्गरसाः**

अस्मिन् भासस्य स्वप्नवासवदत्तनामके नाटके हि प्रधानभूतं शृङ्गाररसमुपकुर्वन्तोऽन्ये हास्य–करुण–वीर–शान्तरसा अङ्गत्वेनाभिव्यक्ताः सन्ति।

**हास्यरसः :** पाणिनीयव्याकरणानुसारेण हसे हासने इत्यस्माद्धातोर्ण्यत्प्रत्ययेन (अष्टाध्यायी ३।१।१४) निष्पन्नस्य हास्यशब्दस्य कोषेषु हासो हसः (अमरकोषः १।७।१८) इति पर्यायद्वयं प्रस्तुतमस्ति। विकृताकारवाग्चेष्टादिभिर्हास्यरसस्योत्पत्तिर्भवति। हास्यरसस्य स्थायिभावो हासः, श्वेतो वर्णः, प्रमथशिवगणश्चाधिष्ठाता यं विकृताकारवाग्चेष्टादिं दृष्वा जना हसन्ति तद्विषयालम्बनं तद्गता चेष्टा उद्दीपनं नयनसंकोचवदनविस्तारादयोऽनुभावाः निद्रालस्याबहित्थाद्या व्यभिचारिभावा भवन्ति।(साहित्यदर्पणः ३।२१४–२१६) स्वप्नवासवदत्तनाटके पद्मावत्या सह वासवदत्तायाः चेट्याश्च वार्तालापे हास्यरसस्य स्थितिर्दृश्यते–

"वासवदत्ता – हला अतिचिरं कन्दुकेन क्रीडित्वाधिकसञ्जातरागो परकीयाविव ते हस्तौ संवृतौ।

चेटी – क्रीडतु क्रीडतु तावद् भर्तृदारिका। निर्वर्त्यतां तावद् अयं कन्याभावरमणीयः कालः।

पद्मावती –आर्ये किमिदानीं मामुपहसितुमिव निध्यायसि ?" (भासः स्वप्नवासवदत्तम्, (ई.२००८), पृ.५३–५४)

अत्र कन्दुकक्रीडन्त्या पद्मावत्या हस्तौ रक्तौ संवृतौ। तौ दृष्ट्वा वासवदत्ता उपहासपूर्वकं वदति। अत्र पद्मावत्यालम्बनविभावः पद्मावत्या रक्तौ संवृत्तौ हस्तावुद्दिपनविभावः वासवदत्तायाः चेट्याश्च मुखविस्तारनयनसंकोचादय अनुभावाः स्मृतिमतिलज्जादयो व्यभिचारिण एतैरभिव्यक्तो हासो हास्यरसमनुभावयति। एवमेव राज्ञ उदयनस्य विदूषकस्य च वार्तालापे हास्यस्योद्भावना भवति–

ऋज्वायतां हि मुखतोरणलोलमालां

भ्रष्टां क्षितौ त्वमवगच्छति मूर्ख सर्पम्।

मन्दानिलेन निशि या परिवर्तमाना

किञ्चित् करोति भुजगस्य विचेष्टितानि ।।(स्वप्नवासवदत्तम् ५।३)

पद्येऽस्मिन् मुखतोरणलोलमालां दृष्टवा सर्पभ्रान्त्या भीतो विदूषको विषयालम्बनं राजा उदयन आश्रयालम्बनं भीतस्य विदूषकस्य चेष्टोद्दीपनं सस्मितमनुभावो भयविशादशङ्कादयश्च व्यभिचारिणो हासश्च स्थायी हास्यरसत्वेनाभिव्यज्यते।

**करुणरसः :** विक्षेपार्थकाद् हिंसार्थकाद् वा कृधातो उनन्(अष्टाध्यायी उणादी ३।५३) प्रत्यये करुणशब्दस्य निष्पत्तिर्भवति। करुणशब्दस्य रसविशेषो वृक्षविशेषः (हैमकोशः ३।२०५) चेति द्वावेवार्थौ कोषेषु सङ्गृहीतौ दृश्येते। करुणरसे हीष्टस्य नाशोऽनिष्टस्य प्राप्तिर्भवति। अस्मिन् कपोतवर्णो यमश्च देवता शोकः स्थायिभावः शोच्यमानमालम्बनं दाहादिकावस्थोद्दीपनं दैवनिन्दाभूपतनक्रन्दनादयोऽनुभावा निर्वेदमोहापस्मारचिन्ताद्या व्यभिचारीणो भवन्ति (साहित्यदर्पणः३।२२२–२२५)। स्वप्नवासवदत्तनाटके करुणरसस्यापि स्थितिर्दृग्गोचरीभवति –

“ब्रह्मचारी – ततस्तस्मिन् मृगयानिष्क्रान्ते राजनि ग्रामदाहेन सा दग्धा। ततस्तामभ्यवपत्तुकामो यौगन्धरायणो नाम सचिवस्तस्मिन्नेवाग्नौ पतितः। ततः प्रतिनिवृत्तो राजा तद्वृत्तान्तं श्रुत्वा तयोर्वियोगजनितसन्तापस्तस्मिन्नेवाग्नौ प्राणान् परित्यक्तुकामाऽमात्यैर्महता यत्नेन वारितः। ततस्तस्याः शरीरोपभुक्तानि दग्धशेषाण्याभरणानि परिष्वज्य राजाऽमोहमुपगतः।” (भासः स्वप्नवासवदत्तम्, (ई.२००८), पृ.३७–३८)

इत्यत्र ब्रह्मचारीद्वारा राज्ञ उदयनस्यावस्थाया वर्णने करुणरसोऽभिव्यज्यते। अत्र हि वह्निना दग्धा वासवदत्ता विषयालम्बनमुदयन आश्रयालम्बनं वासवदत्ताया अग्निदहनादिवृत्तान्तश्रवणमुद्दीपनं भूपतनमनुभावो मोहामर्षादयो व्यभिचारिणः शोकश्च स्थायी करुणरसं व्यञ्जयति।

नैवेदानीं तादृशाश्चक्रवाका नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ताः।

धन्या सा स्त्री यां तथा वेत्ति भर्ता भर्तृस्नेहात् सा हि दग्धाप्यदग्धा।। (स्वप्नवासवदत्तम् १।१३)

अत्रापि शोकमग्नस्य राज्ञ उदयनस्यावस्थां ब्रह्मचारी ब्राह्मणवेषधारियौगन्धरायणसमक्षं वर्णयति। वह्निना दग्धा वासवदत्ता विषयालम्बनमुदयन आश्रयालम्बनं वासवदत्ताया अग्निदहनादिवृत्तान्तश्रवणमुद्दीपनं प्रकरणप्राप्तं हा वासवदत्ते ! हा प्रिये ! हा अवन्तिराजपुत्रि ! इत्यादिविलपनं महीतलपरिसर्पणञ्चानुभावाः चिन्तामोहामर्षादयो व्यभिचारिभावाः शोकनामकं स्थायिनमनुभावयन्तः करुणरसमभिव्यञ्जयन्ति।

श्लाघ्यामवन्तिनृपतेः सदृशीं तनूजां

कालक्रमेण पुनरागतदारभारः।

लावाणके हूतवहेन हताङ्गयष्टिं

तां पद्मिनीं हिमहतामिव चिन्तयामि ॥ (स्वप्नवासवदत्तम् ५।१)

अत्र हि हूतवहेन हता वासवदत्ता विषयालम्बनमुदयन आश्रयालम्बनं मुखमालिन्यमनुभावो 'हूतवहेनहताङ्गयष्टिं तां पद्मिनीं हिमहतामिव चिन्तयामि' इत्यनेनाभिव्यक्ताः स्मृतिचिन्तावितर्कादयो व्यभिचारिण एतैः परिपुष्टो शोकः स्थायी करुणरसमभिव्यञ्जयति।

अस्य स्निग्धस्य वर्णस्य विपत्तिर्दारुणा कथम्।

इयं च मुखमाधुर्यं कथं दूषितमग्निना ॥( स्वप्नवासवदत्तम् ६।१३)

अस्मिन् पद्येऽपि वासवदत्ताविषयिण्युदयननिष्ठा चित्रफलकदर्शनेनोद्दीपिता विलपनादिनानुभाविता शङ्कास्मृतिचिन्तादिभिर्व्यभिचारिभिरभिव्यक्ता रतिः करुणरसमनुभावयति।

**वीररसः :** वीरयते विक्रामति वा विशेषेण ईर्ते इत्यर्थे वीर्धातोरच्प्रत्यये (अष्टाध्यायी ३।१।१३४) व्युपसर्गकाद् ईर्धातो क प्रत्यये वा (अष्टाध्यायी ३।१।१३५) वीरशब्दो निष्पद्यते। संस्कृतवाङ्मये वीरशब्दस्य जीनः भटः श्रेष्ठः (हैमकोशः २।४६९) इत्यर्था लभ्यन्ते। वीररस उत्तमप्रकृतिको भवति। अस्य महेन्द्रदेवता हेमवर्ण उत्साहः स्थायिभावो विजेतव्यादय आलम्बनविभावाः तेषां चेष्टा उद्दीपनविभावाः सहायान्वेषणादयोऽनुभावाः धृतिमतिगर्वरोमाञ्चादयो व्यभिचारिणो भवन्ति। वीररसस्य दानधर्मयुद्धदयादयो बहवो भेदाः सम्भवन्ति। विश्वनाथेन वीररसस्य दानधर्मयुद्धदयारूपेण चत्वारो भेदा निरूपिताः (साहित्यदपर्णः ३। २३२–२३४) स्वप्नवासवदत्तनाटके वीररसस्य दानधर्मयुद्धानां त्रीणां भेदानामुदाहरणानि दृग्गोचरीभवन्ति। यथा –

तीर्थोदकानि समिश्रः कुसुमानि दर्भान्

स्वैरं वनादुपनयन्तु तपोधनानि।

धर्मप्रिया नृपसुता न हि धर्मपीडा–

मिच्छेत् तपस्विषु कुलव्रतमेतदस्याः ॥ ( स्वप्नवासवदत्तम् १।६)

अत्र हि तपस्विनो विषयालम्बनं नृपसुताऽऽश्रयालम्बनमुपवनमुद्दीपनं तीर्थोदककुसुमादीनामाहरणमनुभावः कुलब्रतादिनाभिव्यक्तो धृतिर्व्यभिचारिभाव एतैरभिव्यक्तः पद्मावतीनिष्ठो धर्मोत्साहो धर्मवीररसत्वेनाभिव्यज्यते।

कस्यार्थः कलशेन को मृगयते वासो यथानिश्चितं

दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत्।

आत्मानुग्रहमिच्छतीह नृपजा धर्माभिरामप्रिया

यद् यस्यास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम्॥ ( स्वप्नवासवदत्तम् १।७)

पद्येऽस्मिनाश्रमवासिनस्तपस्विनो विषयालम्बनं नृपजा पद्मावत्याश्रयालम्बनमाश्रमस्थानान्युद्दीपनानि आश्रमवासिभ्यस्तपस्विभ्यः कलशादिदानमनुभावो 'धर्माभिरामप्रिया नृपजा आत्मानुग्रहमिच्छति' इत्यनेनाभिव्यक्ता धृतिमतिगर्वादयो व्यभिचारिण एतैः पद्मावतीनिष्ठो दानोत्साहो दानवीररसत्वेनाभिव्यज्यते।

भिन्नास्ते रिपवो भवद्गुणरताः पौराः समाश्वासिताः

पार्ष्णी यापि भवत्प्रयाणसमये तस्या विधानं कृतम्।

यद्यत् साध्यमरिप्रमाथजनन तत्तन्मयानुष्ठितं

तीर्णा चापि बलैर्नदी त्रिपथगा, वत्साश्च हस्ते तव॥ (स्वप्नवासवदत्तम् ५।१२)

अस्मिन् काञ्चुकीयवाक्ये महाराजो दर्शक आश्रयालम्बनमारुणिः शत्रुर्विषयालम्बनं वत्सान् विजेतुमारुणेश्चेष्टा उद्दीपनानि हस्त्यश्वरथपदातिभिरारुणौ आक्रमणमनुभावः शत्रुविजयेनाभिव्यक्तो हर्षो व्यभिचारी एतैश्चाभिव्यक्तो युद्धोत्साहः युद्धवीररसरूपतां भजते।

उपेत्यनागेन्द्रतुरङ्गतीर्णे तमारुणिं दारुणकर्मदक्षम्।

विकीर्णबाणोग्रतरङ्गभङ्गे महार्णवाभे युधि नाशयामि॥ (स्वप्नवासवदत्तम् ५।१३)

अत्र हि राजा उदयन आश्रयालम्बनमारुणिः शत्रुर्विषयालम्बनमारुणेः चेष्टा उद्दीपनान्युदयनेनारुणिनाशाय कृता प्रतिज्ञाऽनुभावः 'विकीर्णबाणोग्रतरङ्गभङ्गे महार्णवाभे युधि नाशयामि' इत्यादिनाभिव्यक्ता धृतिमतिगर्वादयो व्यभिचारिभावा एतैश्चाभिव्यक्तो युद्धोत्साहो युद्धवीररसरूपतां भजते।

**शान्तरसः :** उपशमार्थकात् शम्धातोः क्तप्रत्ययेन (अष्टाध्यायी ३।२।१०२) शान्तशब्दो निष्पद्यते। संस्कृतवाङ्मयेऽतिमुक्तार्थे रसविशेषे शमयुक्ते धारणार्थे (मेदिनीकोषः ५८।६२–६४) च प्रयुक्तस्य शान्तशब्दस्य

शमितपर्यायरूपेण (अमरकोषः३।१।९७) प्रयोगो दृश्यते। उत्तमप्रकृतिकस्य शान्तरसस्य कुन्देन्दुपुष्पसदृशः शुक्लवर्णः श्रीनारायणश्च देवता भवति। शान्तरसस्य समस्थायी अनित्यत्वदुःखमयत्वादिना संसारस्यासारत्वज्ञानं परमात्मस्वरूपमालम्बनविभावः पुण्याश्रमास्तीर्थस्थलानि रम्यवनानि चोद्दीपनविभावा रोमाञ्चादयोऽनुभावा निर्वेदहर्षस्मरणमत्यादयश्च व्यभिचारिणो भवन्ति। स्वप्नवासवदत्तनाटकेऽस्मिन् शान्तरसस्यापि प्रयोगस्थलानि लभ्यन्ते–

परिहरतु भवान् नृपापवादं न परुषमाश्रमवासिषु प्रयोज्यम्।

नगरपरिभवान् विमोक्तुमेते वनमभिगम्य मनस्विनो वसन्ति॥ ( स्वप्नवासवदत्तम् १।५।)

आश्रमात् तपस्विन उत्सारयन्तौ भटौ सम्बोध्य प्रस्तुतेऽस्मिन् कञ्चुकीयपदवाक्य आश्रमस्था मनस्विन आलम्बनविभावा विमोक्तुमित्यादिनाभिव्यक्तं संसारासारत्वज्ञानं विषयालम्बनमाश्रमस्थलान्युद्दीपनानि विमुक्तये वनगमनमनुभावो मतिश्च व्यभिचारिभाव एतैरभिव्यक्तः शमो स्थायी शान्तरसे परिणमति।

विस्रब्ध हरिणाश्चरन्त्यचकिता देशागतप्रत्यया

वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः।

भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो

निःसन्दिग्धमिदं तपोवनमयं धूमो हि बह्वाश्रयः॥ (स्वप्नवासवदत्तम् १।१२

ब्रह्मचारिकथनेऽस्मिन् विश्रान्तुकामा ब्रह्मचारी आलम्बनं तपोवनमुद्दीपनं निःसन्देहतया विहितो विश्रामोऽनुभावः हर्षमत्यादयो व्यभिचारिभावा एतैरभिव्यक्तः शमस्थायी शान्तरसरूपतां भजते।

## निष्कर्षः

महाकवेर्भासस्य नाटकेषु षडङ्कयुतं स्वप्नावासवदत्तनाटकमतीव सरलमभिनेयं श्रेष्ठतमञ्च मन्यते। नाटकेऽस्मिन् शृङ्गारहास्यकरुणवीरशान्तानां पञ्चरसानां प्रयोगो वर्तते। शृङ्गाररसस्यापि संयोगविप्रलम्भयोरुभयोरेवभेदयोः स्थितिर्दृग्गोचरीभवति। विप्रलम्भस्य पूर्वरागविप्रलम्भस्य करुणविप्रलम्भस्य चेति भेदद्वयस्योदाहरणान्यत्र प्राप्यन्ते। नाटकस्य प्रथमाङ्कात् षडङ्कपर्यन्तं कुत्रचित् संयोगतया कुत्रचित् पूर्वरागविप्रलम्भत्वेन कुत्रचित् करुणविप्रलम्भत्वेन शृङ्गाररसस्य प्रबन्धव्यापितया प्रयोगो विहितोऽस्ति। यद्यपि नाटकेऽस्मिन् विप्रलम्भशृङ्गाररसस्य बाहुल्येन प्रयोगस्य कारणात् विप्रलम्भस्याङ्गित्वं स्वीकुर्वन्ति केचन समीक्षकाः तथापि नाटकस्यावसानं तु संयोगशृङ्गारे वर्तते, नाटकस्य मुख्यं फलमपि संयोग एव वर्तते। अतः स्वप्नवासवदत्तनाटके संयोगशृङ्गारस्य प्राधान्यमङ्गित्वञ्च स्वीकर्तुं शक्यते विप्रलम्भशृङ्गारस्तु संयोगस्य पोषकतयाऽङ्गरूपेण प्रस्तुतो विद्यते। एवमेव हास्यकरुणवीरशान्तानां रसानाञ्च प्रयोगो गौणरूपेण विहितो वर्तते। एतदेव निष्कर्षरूपेण कथयितुं

शक्यते यत् स्वप्नवासवदत्तनाटके संयोगशृङ्गाररसस्य प्राधान्यमङ्गित्वञ्च वतर्ते, अन्येषाञ्च विप्रलम्भशृङ्गारस्य हास्यकरुणवीरशान्तानां रसानामङ्गिरसस्य पोषकतया गौणरूपेणाङ्गतया प्रयोगो विहितोऽस्ति।

### कृतज्ञताज्ञापनम्

शोधलेखमिमं प्रकाशनयोग्यं विधातुं निर्देशनानि दत्तवद्भ्यो गुर'भ्यः प्रकाशनार्थं स्वीकृतिं दत्तवद्भ्य विज्ञेभ्यः प्रकाशकेभ्यश्च सादरं हार्दिकीं कृतज्ञतामुपहरामि।

### सन्दर्भग्रन्थसूची

अमरसिंहः(ई.१९७०), अमरकोषः, वाराणसीः चौखम्बा सीरीज अफिस।
आप्टे, वामन शिवराम(ई.१९७९), आप्टेकोषः, दिल्ली, पटना, वाराणसीः मोतीलाल वनारसीदास।
उपाध्यायः, बलदेवः(ई.१९८२), महाकवि भासः एक अध्ययन, वाराणसीः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।
जगन्नाथः(ई.२००३), रसगङ्गाधरः(प्रथमाननः), वाराणसीः चौखम्बा विद्याभवन।
ज्ञवाली, रीता(वि.सं. २०६२) रससङ्ख्यानविमर्शः, नेपालसंस्कृतविश्वविद्यालयः, अप्रकाशितः शोधप्रबन्धः।
त्रिवेदी, रामगोविन्दः(अनुं)(ई.१९९७), ऋग्वेदः, वाराणसीः चौखम्बा विद्याभवन।
दीक्षितः, भट्टोजी (ई. २००१), वैयाकरणसिद्धान्तकौमुदी(तृ.भा.),वाराणसीः मोतीलाल वनारसीदास।
नन्दकेश्वरः(ई.१९३४), अभिनयदर्पणः(सं.व्या.एम.एम.घोषः), कलकत्ता।
पाणिनिः(ई १९५०), अष्टाध्यायी वाराणसीः चौखम्बा सीरीज अफिस।
भासः(ई.१९७९), स्वप्नवासवदत्तम् (व्या. शेषराजशर्मा रेग्मी), वाराणसीः चौखम्बा सुरभारती प्रकाशन।
मम्मटः(ई.२००४), काव्यप्रकाशः, वाराणसीः ज्ञानमण्डललिमिटेड।
मिश्रः, रामजी(व्या.) (ई.१९७६) , भासनाटकचक्रम् (प्र.भा.), वाराणसीः चौखम्बा विद्याभवन।
विश्वनाथः(ई. २०००), साहित्यदर्पणः दिल्ली...पटनाः मोतीलाल वनारसीदास।
हेमचन्द्रः(वि.सं. १९३०), हैमकोशः(षट्कोशसङ्ग्रहः) वाराणसीः श्री ३ महाराजशिवलालदुबे।
शास्त्री, मधुसूदनः(सं.)(ई.१९७१), नाट्यशास्त्रम् (प्र.भा.), वाराणसीः काशी हिन्दू विश्वविद्यालय।
शुक्लः, बाबुलालः(सं.) (वि.सं.२०५७), नाट्यशास्त्रम् (प्र.भा,तृ.सं.), वाराणसीः चौखम्बा संस्कृत संस्थान।